ह्रियते तत्र सूर्य्यस्यायनं सौरैः षड्भिर्मासैरेकं भवतीति च तत्रैव प्रसिद्धम्। "अयनविष्णुपदीषडशीतय" इत्युक्तेः २अयनाख्यसंक्रान्तौ सा हि परिभाषिकायनशब्दवाच्या। नभोमण्डले प्रवहानिलेन पश्चाद्गत्या बंभ्रम्यमाणस्य राशिचक्रस्य निराधारतया दोलायमानत्वेन सप्तविंशांशपर्य्यन्तं प्राक् पश्चाच्च गतिर्भवति। क्रान्तिस्थानञ्च अष्टमासाधिक ६६।८ षट्षष्टिवर्षैरेकैकमंशमतीत्य प्राक्, पश्चाद्वा चलतीति १८०० अष्टदशशतवर्षैः सप्तविंशांशपर्य्यन्तं प्राक्गत्वा पुनः पश्चात्, पश्चाद्गत्वा च पुनः प्रागवलम्बते। यदा चैवं राशिचक्रस्यायनस्थानं प्राक् गच्छति तदा राशिचक्रनिर्द्दिष्टमेषादिस्थानात् उक्तकालभेदेनैकैकांशातिक्रमेण क्रमशः प्राचि, प्राक्तरे, प्राक्तने, वा स्थाने रव्यादिग्रहाणां प्रभापुञ्जसञ्चारः। यदा तु पश्चादवलम्बते तदा निर्दिष्टमेषादिस्थानात् तथैव परे, परतरे, परतमे, च स्थाने ग्रहाणां प्रभापुञ्जसञ्चार इति भेदः। इदानीञ्च पश्चिमायनं तेन राशिस्थानात् पश्चादेव ग्रहप्रभापुञ्जसञ्चारः। तथाच ज्योतिषोक्तगणितरीत्या मीनान्तात् पश्चादेकविंशांशे एवेदानीं विषुवादिसंक्रान्तिर्भवति एवं विष्णुपद्यादीनामपि तत्तदंश एव ग्रहप्रभापुञ्जसञ्चारः। अयञ्चायनानुसारेण ग्रहप्रभापुञ्जसञ्चारस्वीकारः दिनमानविशेषस्य लग्नपरिमाणस्य छायापदविशेषस्य, च बोधार्थमिति सिद्धान्ते प्रसिद्धम्। करणे ल्युट्। ४उक्तायनज्ञानसाधने शास्त्रे, "ज्योतिषामयनञ्चैवेति" ५सैन्यनिवेशविशेषरूपव्यूहप्रवेशमार्गे च "अयनेषु च सर्व्वेषु यथाभागमवस्थिताः" इति गीता। आधारे ल्युट्। ६पथि, ७गृहे, ८आश्रये, ९स्थाने, "तायदस्यायनं पूर्व्वमिति" मनुः। प्रागुक्तराशिचक्रस्य क्रान्तिवृत्तारम्भस्थानविशेषे १०अंशादौ च "तत्काले सायनार्कस्येति" नीलकण्ठः। तथाहि मीनान्तो हि युगादौ अयनांशप्रथमस्थानं ततःप्राग्गत्या कियदंशपर्य्यन्तचलनेन परावृत्य पश्चाद्गत्या पूर्वराशेः कियदंशपर्य्यन्तं गत्वा पुनःप्राग्गत्या प्राथमिकचलनस्थानप्राप्तौ अयनस्यैकोविलक्षणो भगणो भवति इत्येवं स्थिते तद्भगणपूरणकालादिज्ञापनाय किञ्चिदभिधीयते। सूर्यसिद्धान्ते। "त्रिंशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते। तद्गुणाद्भूदिनैर्भक्ताद्द्युगणाद्यदवाप्यते॥ तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः। तत्संस्कृताद्ग्रहात् क्रान्तिच्छायाचरदलादिकम्" इति॥ "भानां चक्रं राशीनां वृत्तं क्रान्तिवृत्तं स्वस्वविक्षेपमितशलाकाग्रप्रोतनक्षत्रगणैर्युक्तमित्यर्थः। युगे महायुगे प्राक् पूर्व्वविभागे त्रिंशत् कृत्यस्त्रिंशत्सङ्ख्यका कृयः विंशतयः षट्शतमित्यर्थः। परिलम्बते ध्रुवाधारभगोलस्थानात् तद्दूरमवलम्बते। अत्र परिलम्बत इत्यनेन भचक्रपूर्णभ्रमणाभाव उक्तोऽन्यथा ग्रहभगणप्रसङ्गेन मध्याधिकार एवैतदुक्तं स्यात्। तथा च तद्दूरमवलम्बनोक्त्या परावृत्य यथास्थितं भवतीत्यागतं यथापि स्वस्थानात् तथैव पश्चिमतोऽप्यवलम्बत इति सूचितम्। एवञ्च भचक्रं पश्चिमत ईश्वरेच्छया प्रथमतः कतिचिद्भागैश्चलति ततः परावृत्य यथास्थितं भवति ततोऽपि तद्भागैः क्रमेण पूर्व्वतश्चलति ततोऽपि परावृत्य यथावस्थानंस्थितमित्येको विलक्षणो भगणः। तेन प्रागित्युपलक्षणम्। पश्चिमावलम्बनानुक्तिस्तु संवादकाले तदभावात्। अत्र त्रिंशत्कृत्व इति पाठः प्रामादिकः। "युगे षट्शतकृत्वो हि भचक्रं प्राग्विलम्बते" इति सोमसिद्धान्तविरोधात्। "तत् पश्चाच्चलितं चक्रमिति" ब्रह्मसिद्धान्तोक्तेश्च। अहर्गणात् तद्गुणात् षट्शतगुणिताद् भूदिनैर्युगीयसूर्यसावनदिनैर्भक्ताद्यत् फलं भगणादिकं प्राप्यते तस्य भगणत्यागेन राश्यादिकस्य भुजः कार्यस्तस्माद्भागांशा दशभिर्भजनेनाप्तभागास्त्रिगुणिता अयनसंज्ञका ज्ञेयाः। भुजांशास्त्रिगुणिता दशभक्ताः फलमयनांशा इति तात्पर्य्यार्थः। तत्संस्कृतात् तैरयनांशैर्भचक्रपूर्व्वापरचलनवशाद्युतहीनाद्ग्रहात् पूर्व्वापरभचक्रचलनावगमस्त्वयनग्रहस्य षड्भान्तर्गतानन्तर्गतत्वक्रमेण क्रान्तिच्छायाचरदलादिकं साध्यम्। न केवलात्, बिशेषोक्तेः। छाया वक्ष्यमाणा चरदलं चरं पूर्व्वाधिकारोक्तम्। आदिशब्दादयनवलनमायनदृक्कर्म्म सङ्गृह्यते। यद्यपि तत्संस्कृताद्ग्रहात् क्रान्तिरित्येव वक्तव्यमन्येषामत्र तदुपजीव्यत्वाद्ग्रहणं व्यर्थं तथापि क्रान्तिरित्युक्त्या केवलक्रान्तिज्ञानार्थं तत्संस्कृतग्रहात् क्रान्तिः साध्या। पदार्थान्तरोपजीव्यायाः क्रान्तेः साधनं तु केवलादित्यस्य वारणार्थं क्रान्तिमात्रं तत्संस्कृतात् साध्यमिति सूचकं छायाचरदलादिकथनम्। ईश्वरेच्छया क्रान्तिवृत्तं स्वमार्गे पश्चिमतः सप्तविंशत्यंशैः क्रमोपचितैश्चलितं ततः परावृत्य स्वस्थान आगत्य तत्स्थानात् पूर्वतः सप्तविंशत्यंशैश्चलितम्। तथा च सृष्ट्यादिभूतक्रान्तिविषुवद्वृत्तसम्पाताश्रितक्रान्तिवृत्तप्रदेशो रेवत्यासन्नः प्रागानीतग्रहभोगावधिरूपः स्वस्थानात् पूर्व्वमपरत्र वा क्रान्तिवृत्तमार्गे गतः। बिषुवद्वृत्ते तु तद्भागस्य वा पश्चिमभागः पूर्व्वभागो वा गतः। सम्पाते तद्वृत्तयोर्याम्योत्तरान्तराभावात् क्रान्त्यभावः। पूर्व्वसम्पातप्रदेशे तु तयोर्याम्योत्तरान्तरत्वात् क्रान्तिस्तत्पन्नातो यथास्थितग्रहभो-